International Journal of Applied Research 2019; 5(8): 187-189




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2019; 5(8): 187-189
www.allresearchjournal.com
Received: 12-06-2019
Accepted: 15-07-2019

**डॉ0 संजीत कुमार झा**
ग्रा0+पो0– नरौचधाम,
भाया–रतनपुर, जिला–दरभंगा,
बिहार, भारत

# ज्योतिषशास्त्रे विवाहसंस्कारस्य महत्त्वम्

**डॉ0 संजीत कुमार झा**

**प्रस्तावना:**

''विवाह'' शब्दस्य व्युत्पत्तिः 'वि' उपसर्गपूर्वक 'वह्' प्रापणे धातोः 'घञ्' प्रत्ययात् जायते। धर्मशास्त्रे विवाहस्यानेके समानार्थकाः शब्दा लभ्यन्ते। यथा– उद्वाहः, परिणयः, पाणिग्रहणं, स्वीकरणम्, उपयावश्चेत्यादयः। तत्र वहनमेव वाहः। विशिष्टो वाह्ये विवाह उच्यते। किमत्र वैशिष्ट्यम् ? प्रतिग्रहादिषु अष्टविधोपायेषु अन्यतमेनोपायेन स्वीकृतानां होमादिसप्तपद्यन्तानां कर्मणां संस्कृतत्वमेव तत्र वैशिष्ट्यम्।

विवाहसंस्कारस्य अभीष्टताम्, अनिवार्यतां, महिमानं च वीक्ष्य प्रश्नोऽयं स्वभावत उदेति यत् को नाम विवाहः ? अस्य प्रश्नस्य विचारप्रसङ्गे विविधाः शौाः समक्षमायान्ति यत् विवाहो नाम–

1. कामाश्रिता काचन मर्यादा।
2. पुत्राभिलाषेण विहितः पुंस्त्रीसम्बन्धः।
3. उपर्युक्तं सम्बन्धं निर्वोढुम् अपेक्षितं बाह्यबन्धनमात्रम्।
4. स्त्रीपुंसोः वास्तविकं तात्म्यम्।

विवाहमाश्रित्य धर्मशास्त्रीयग्रन्थेषु न काऽपि स्वतन्त्रता परिभाषा समुपलभ्यते। स्मृतिसूत्रादिषु निर्दिष्टैः विधिविधानैः ज्ञायते यत् व्यापकार्थे विवाहः किमपि ससमाजोन्नायकं महद् दायित्वं वर्तते। काममूलकोऽप्येष धर्म प्रजाश्चोद्दिश्न् मानवं सर्वदा परेभ्यस्तस्य जीवितत्वं स्मालति। डॉ0 वासुदेवशरण अग्रवालः विवाहं परिभाषमाणः प्रतिपादयति–

''स्त्री पुमांसौ उभौ नदीतटाविव सम्पृक्तौस्तः। उभयोरन्तः जीवनधारा प्रवहति। वैदिकसाहित्ये स्त्रीपुंसोः उपमा पृथिवी–द्युलोकाभ्यां विहिता। अमोहमस्मि सा त्वं सामाहमस्म्यृक् द्यौरहं पृथिवी त्वम्। अमोहमस्मि सा त्वं सा त्वमस्यमोहं धौरहं पृथिवी त्वं सामाहमृक् त्वम्।[1] शुक्त्या द्विदलान्तः स्थितं मौक्तिकमिव स्त्रीपुंसोर्मध्ये सन्ततिस्तिष्ठति । धावापृथिव्यौ एकामेव संस्थां मिथः पूरयतः। यदा द्युचारिणो जलदा वर्षणेन पृथिवी गर्भमतीं विदधति तदा तरूवनस्पत्यादयो जायन्ते। एषैव स्थितः पत्युः पत्न्याश्चापि वर्तते। भिन्नावपि तो अभिन्नौ स्तः। विवाहसंस्कारः खलु उभयोरभेदस्य स्वीकारणं वर्तते[2]।

आवापृथिवीभ्यां स्त्रीपुंसोरूपमा इदमेवोद्दिशति यत् सृष्टेः मूलभूतो हेतुरिव तो द्वैधीभूतावपि जीवनाधारितेभ्यः समग्रव्यापारेभ्यः परस्परमनिवार्यो स्तः[3]।

मनुरपि प्रत्यपादयत् यत् गार्हस्थ्ये पतिः पत्नी चोभयोरेव समस्थितिरस्ति। उभयोने कोऽप्यधमो न कोऽप्युत्तमश्च भवति उभौ सम्पृक्तौ गार्हस्थ्यमुन्नयतः

एतावानेव पुरुषो यज्जायाऽहत्मा प्रजेति ह।
विप्राः प्राहुस्तथा चैतद्यो भर्ता स्मृताऽत्रा[4]।।
मनुः विवाहस्योद्देश्यं निरूपयन्नाह–
उत्पादनमपत्यस्य जातस्य परिपालनम्।
प्रत्यहंलोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम्[5]।।

अनयोक्त्या धर्मसंस्कारत्वेन विवाहस्य विवेचनेन विवाहसंस्कारस्य त्रिविधिमुद्देश्यं लक्ष्यते– धर्मकार्याणि पुत्रप्राप्तिः, निसर्गजा रतिश्येति। आचार्या एतेषु विष्वपि आद्यं धर्मकार्यमेवोद्दिष्टवन्तः। रतिस्त्वन्तिमं स्थानं धत्तेः–

अपत्यं धर्मकार्याणि शुश्रूषा रतिरूत्तमा।
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च हि[6]।।

**Corresponding Author:**
**डॉ0 संजीत कुमार झा**
ग्रा0+पो0– नरौचधाम,
भाया–रतनपुर, जिला–दरभंगा,
बिहार, भारत

याज्ञवल्क्यस्तु विवाहेन द्वेधा उद्दिशति – पुत्रपौत्रादिलाभः स्वर्गलाभश्चेति। धर्मकार्याणि अनुष्ठीयैव सवर्गप्राप्तिः स सम्भाव्यते।

लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः।
यस्मात्तस्मात् स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः[7]।।

आपस्तम्बो विवाहस्य द्विविधमेव प्रयोजनं मनुते–धर्मः प्रजाचेति[8]। रतिस्तु लौकिकं प्रयोजनं यच्च पुत्रोत्पत्ता वेव पूर्यते।

**धर्मकार्याणि–**

विवाहस्यय प्रथमं प्रयोजनं धार्मिककृत्यानां सम्यग् निर्वहणमस्ति। पञ्चमहायज्ञान् प्रतिनित्यमनुष्ठातु देव–पितृ–ऋषीणां त्रिभ्यः ऋणेभ्य उद्धर्तुं गुहस्थाश्रमो विहितः। यज्ञे सपत्नीकत्वम् अनिवार्यम्[8]। 'मयौ मिथुना यजन्नः' कृतोद्वाह एव मनुजो यज्ञशीलः स्यात्। यज्ञः परिवारस्य समाजस्य व दृष्ट्याऽत्यधिकं महत्त्वमादधाति। आचार्यः पाणिनिः ''पत्युर्नोषज्ञसंयोगे''[9] इति सूत्रेण पत्या सह यज्ञे आसीनैव पत्नीति व्युतपादयत्। अत एव धर्मशास्त्रे पत्न्यां मृतायां यज्ञानुष्ठानाय पुनर्विवाहं निर्दिशन्त्याचार्याः–

दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः।
आहरेद्विधिवद् दारानग्नींश्चैवाविलम्बयन्[10]।।

गोभिलः स्फुटं प्रत्यपादयत यदुपरतायां पत्न्यामपि वैदिकाग्नेस्त्यागो यथा न जायेत तथा उपयोऽन्वेष्टव्यः[11]। अत एव रामोऽश्वमेधयज्ञम् अनुष्ठातुं सीताया अनुपस्थितो काञ्चनप्रतिमां निरमापयत्– ''काञ्चनीं मम पत्नीं[12] च'' इति। डॉ0 वासुदेवशरण अग्रवालः हिन्दूपरिवारस्य सन्दर्भे धर्मं यज्ञोत्व सुष्ठु व्यवेचयत्–
''धर्मस्तान् सत्यरूपान् नियमानभिप्रैति ये मनुजस्य समाजस्य च जीवनं दधते। धर्मोऽयं कर्तव्यरूपेण परिवारस्य प्रतिसदस्यं सन्मुखी भवति। पिता, माता, बन्धुः– येऽपि परिवारेण सम्बद्धास्ते समेऽपि कर्तव्यर्णेन बद्धा भवन्ति। यत्र कर्तव्यं तत्र विरोधो न तिष्ठत्येव। कर्तव्याग्रहो मनुजस्य विचारान् कर्माणि च उद्वेगातीतानि विदधाति। कर्तव्याग्रहेण स सेवापथ माश्रयति। अस्या एव भावनाया अपरं नाम यज्ञो वर्तते। यत्र मनुजाः परेभ्यः स्वार्थे सुखं च समर्प्य परोपकारवत्मिकां युक्तिं लभते, स जीवनविधिरेव यज्ञोऽभिहितः[13]।''
महाभारते भष्टमः स्फुटमुद्घोषयति यत् देवेभ्यः– पितृभ्यश्च बलिप्रदानाय धर्मस्थोपितानुष्ठानाया विवाहो विधीयते[14]।

**पुत्रप्रापितः–**

सन्तात्या मानव आत्मानममरं मन्यते। औरसुपुत्रस्य प्राप्तेनन्यं साधनं वर्तते विवाहसंस्कारः। आनः प्रजा जनयतु[15]'' इत्यादिभिर्वचनैः पुत्रेच्छा स्थले स्थले अभिव्यक्ति मगात्। आचार्यः स्नातकोपदेशे तमनुशासयत् स प्रजातन्तुम् अविच्छिन्नां स्थापयेत्।

आद्यार्माय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

पुत्र एवं पितुः धार्मिककर्मणाम् उत्तराधिकारंविन्दते, पितृयज्ञो नाम श्राद्धं यच्च पुत्रेणैव सम्पादनीयम्। अभ्युदयनिश्श्रेयससिद्धयै पुत्रप्राप्तिरत्यन्तम् अपेक्ष्यते– ''धर्मार्थं किल सन्ततिः[16]।'' अत एव अपुत्रा गृहस्थ विविधैः मन्त्र– यज्ञ– तपः प्रभृतिभिः पुत्रप्राप्त्ये प्रायतन्त–

महता तपसा लब्धो विविधैश्च परिश्रमैः।
एको दशरथस्यैष पुत्रः सदृश लक्षणः[17]।।

तत्र 'पुनातिपित्रादीन्' उत 'पुतस्त्रायते' इति पुत्रः। 'पुत्' नामकात् नरकात् यस्त्रायते सपुत्र इति–

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः।
तस्मात् पुत्र इति प्रोक्तः पितृन् यः पाति सर्वतः[18]।।

नरकं नाम कष्टं, दुःखम्। 'पुत' नाम नरकस्य स विशिष्टो भागो यम् अपुत्रिणः प्राप्नुवन्ति। पुत्रोऽस्मादेव दुःखात् पितरं त्रायते। यथा–

पुदिति नरकस्यख्या दुःखं च नरकं विदुः।
पुदि त्राणात् ततः पुत्रमिहेच्छन्ति परत्र च[19]।।
तस्मात् पुत्रमनुशिष्टं लोक्यमाहुः' इति।

शिवः पार्वत्या सह विवाहं सप्तर्षीणां मध्यमेन प्रस्तुवन् हिमालयं प्रति निवेदयति यत् स पुत्रेच्छया पार्वतीं विवोढुमिच्छति–

अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम्[20]।।

लोके एवम्भतस्य पुत्रमहिम्नो नैकानि शास्त्रसम्मतानि कारणानि वर्तन्ते। पुत्रेण वंशः प्रतिष्ठितो भवति–

''कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन्[21]।''

**कामः–**

चतुर्षु पुरुषार्थेषु कामोऽप्यन्यतयो वर्तते। स च प्राणिनां काचन सहजाता प्रधाना वृत्तिवर्तते। पतिः 'पत्नी' अपि च संयतो विद्वान् उपयुकतवस्थायांकामभावं प्राप्नुवन्ति खलु। अतो वृत्तिरियं निदितेति सर्वथा परिहर्तुं वर्णितुं च न शक्यते। जीवनं सहजं हितकरं प्रियकरं च विधातुं मनीषिणो कामं वैवाहिकप्रयोजनेषु अन्यतमं प्रयोजनमत्रिकृत्य तं संयतं मर्यादितं चाकुर्वन् प्रयोजनेषु अन्तिमं स्थानमादधानोऽपि कामोऽन्चमहत्त्ववान् न भवति। धर्मानुप्रणितां रतियाचरन् गृहस्थोऽपि ब्रह्मचार्येव मन्यते–

निन्द्यास्वष्यसु चान्यासुस्त्रियो रात्रिषु वर्णयम्।
ब्रह्मचार्येव भवति यत्र तदाश्रमे वसन्[22]।।

भगवान् श्रीकृष्णे गीतायाम् आत्मानं धर्मानुकूलं कामतः प्रतिपादयति–

''धर्माविरूद्धो भूतेष कामोऽस्मि भरर्षभः[23]।''

रतं वैवाहिकं प्रयोजनं विधाय शास्त्रकृतः स्वीयामूदां पत्नीमतिरिच्य अन्यस्त्रिया सह रतिं प्रतिषिद्धवन्तः। यतो रतिः सन्ततिहेतुः वर्तते, सन्ततिश्च मनुजस्य सामाजिकप्रतिष्ठाया हेतुभूता–

''अपत्यं नाम लोकेषु प्रतिष्ठा धर्मसंहिता[24]।''

शास्त्रकाराः प्रथमविवाहमेव प्रशस्तं मन्वते। दक्षः प्रथमोदां स्यिमेव 'धर्मपत्नी' मभिधाय द्वितीयां रतिवर्धिनी माह–

'प्रथम धर्मपत्नीस्याद् द्वितीया रतिवर्धिनी[25]।''

विवाप्रयोजनमाद धानोऽपि कामोऽधम एव विगण्यते। तत्र धर्मशास्त्रे प्रथम औरसपुत्र एव पुत्रत्वेन मन्यते तस्यैव यज्ञपिण्डदानादिष्वधिकारात्। अन्ये औरसा अपि 'कामजा' एवामिधीयन्ते। औरसं पुत्र परिभाषमाणौ बोधायनः ''सवर्णायां संस्कृतायमुत्पादितमौरसपुत्रं विधात्'' इति सजातीयायामेव स्वयमुत्पादित औरसो ज्ञेयः। मनुरपि इदमेव निर्दिशति–

स्वक्षेत्र संस्कृताया तु स्वयमुत्पादयेद्भियम्।
तमौरसं विजानीयाऽपुत्रं प्रथमकल्पितम्[26]।।

वात्स्यायनः सवर्णायां भार्यायां प्रवृत्तं कामं 'पुत्रीय' निर्दशति यतः कामोऽयम् औरसपुत्रस्य निमित्तभूतः–

कामश्चतुर्षु वर्णेषु सवर्णतः शास्त्रतश्चानन्य पूर्वायाम्।
प्रयुज्यमानः पुत्रीयो यशस्यो लौकिकश्च भवति[27]।।

रतिप्रयोजनमात्रमाश्रित्यैव अधमवर्णया कन्यया सह विवाहो विहितो वर्तते। मनुस्तु नामोल्लेखपुरस्परं विवृणोति यत् द्विजातिषु प्रथमविवाहोद्देशेन सवर्णा कन्या प्रशस्त कामः। प्रवृत्तेभ्यः पुरुषेभ्यो द्वितीयविवाहमुद्दिश्य अनुलोमक्रमेण कन्याः प्रशस्ता भवन्ति–

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तामिमाः स्युः क्रमशो वराः।।
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते।
ते च स्वा चैव राज्ञश्च ताश्च स्वाचाग्रजन्मनः[28]।।

विवाहसंस्कारान्ते अनुष्ठीयमानंत्रिरात्रव्रतम् आत्मसंयमं शिक्षयति। व्रतामदंसूचयति यद् वैवाहिक जीवने स्थायित्वम् असंयतकामेन न प्रत्युतआत्मसंयमेन आधीयते।
उपर्युक्त विवेचनमिदं स्पष्टयति यद् विवाह संस्कारो मानवस्य सबलां कामवृत्तिं मर्यादयितुं विहिता सा व्यवस्था वर्तते या मानवं भोगात् संयमं प्रवृत्त्या निवृत्तिं चौद्दिश्य अग्रेसर्तुमभि प्रेरयति। संस्कारोऽयं भोगस्य न प्रत्युत योगस्य साधनम्। अयं हि धार्मिकः संस्कारो यो मुख्यतो धर्मानुपालनम्, सन्तत्युत्पादनम्, तदाधारेण मानवजात्याः संरक्षणं संवर्धनं चोद्दिशति संस्कारोऽयं प्रबोधयति यीत् वैयक्तिकं सुखमेव जीवनसय प्रेरको नियमो न प्रत्युत सामाजिको उत्तरदायित्वस्य निर्वहणमेव जीवनस्य मुख्यं ध्येयं स्यात्। भारतीसंस्कृतेः इदमेव वैशिष्टयं यत् संस्कृतवाङ्मये स्त्रीपुंसोः यथाविधि समागमोऽपि कामप्रधानतामत्रिकृत्य प्रायेण नोपवर्णितः। एष समागमोऽपि पुत्रोत्त्पतेः दायित्वबोधेन विधीयमाधार्मिकं कृत्य वर्तते, यस्य कृते पृथक्ततया गभाधानसंस्कारस्य विधानमाचार्यैः प्रतिपादितं वर्तते[29]।
अस्माकं दैनन्दिनजीवनस्य सर्वाऽपि क्रियाः, मनोदेहबुद्धीनां व्यापारश्च धर्मेणैव नियम्यते। अतः स्त्रीपुंसोः अनियमितानां पाशविकप्रवृतीनां नियमनपुरस्सरमअभ्युदयनिःश्रेयससिद्धिः, दम्पत्योः मधुरसमन्वयेन उभयोरेव पूग्रतायाः सिद्धिः विवाहस्य धार्मिकं प्रयोजन वर्तते। उभयोः मधुरेण पुणीतेन च समञ्जसनेन पारिवारिकस्य सामाजिकस्य राष्ट्रियस्य च जीवनस्य सुव्यवस्थापनम्, सुख–स्वास्थ्य–शान्तीनां सुरक्षणं विवाहस्य सामाजिकं प्रयोजनं वर्तते[30]।

**विवाहभेदाः–**
यद्यपि वैदिकसाहित्ये अष्टविधानां विवाहानां नामोल्लेख पुरस्सरं स्पष्टं वर्णनं नोपलभ्यते, तथापि तेषां मूलविषयकं साक्ष्यं नूनं दृग्गोचरी भवति। ऋग्वेदीये विवाहसूक्ते[31] यत्र कन्यादानं वर्णितम्, तत्प्रप्रसत्रत् ब्राह्मविवाहस्य सौत ग्रहीतुं शक्यते। ऋग्वेदसम्बद्धायां बृहद्देवतायां श्यावाश्वस्य गाथा वर्तते। तत्र राज्ञे रथवीथेः यज्ञे पौरोहित्यमादधान आत्रेयः अर्चनाना आत्मजाय श्यावाश्वाय राजपुत्रयाः पाणिमयाचत्। विवाहोऽयं दैवविवाहेऽन्तर्भयति। विमदगाथायां हरणात्मको विवाहो लक्ष्यते यत्र विमदः पुरुमित्रस्य सुतां मातापित्रोः सहमतिमनादायैव नयति[32]। किन्तु उपर्युक्तेषु प्रसत्रेषु क्वापि विवाहभेदस्य नामोललेखनम्, अपि च तत्सम्बद्धं विवाहविधानं नोपवर्णितम्। एतत्तु निश्चप्रचं यद् ऋग्वेदकाले विवाहः सामाजिकसंस्थात्वेन सुप्रतिष्ठित आसीत्।
गृह्यसूत्राणां कालेऽपि विवाहभेदाः पृथक्त्या न लभ्यन्ते। गृह्यसूत्रेषु वर्णितो वैवाहिको विधिः कन्यादानस्य कृत्यं न स्पृशत्येव।

**सन्दर्भ ग्रंथ सूची :**

1. ऐतरेयब्राह्मण 1/15/5
2. हिन्दूपरिवार मीमांसा– भूमिका, हरिदत्त वेदालंकार, पृ. 22
3. तत्रैव– पृ. 22
4. मनुस्मृतिः 9/45
5. मनुस्मृतिः 2/67
6. तत्रैव 9/27
7. याज्ञवल्क्यस्मृतिः 1/78
8. आपस्तम्बधर्मसूत्रम् 2/5/11
9. शतपर्थब्राह्मणम् 5/4/6/10
10. अष्टाध्यायी– 4/1/133
11. याज्ञवल्क्यस्मृतिः 1/89
12. गौतमस्मृतिः 3/9
13. वाल्मीकियरामायणम्– 1/89
14. वेदालंकार हरिदत्त, हिन्दूपरिवारमीमांसा, भूमिका पृ. 24
15. महाभारतम्– 13/20/61–63
16. ऋग्वेदः – 10/85/43
17. महाभारतम्– 13/20/62
18. वाल्मीकिरामायणम्– 2/86/12
19. वाल्मीकिरामायणम्– 2/07/12
20. व्यासस्मृतिः 4/43
21. कुमारशम्भवम्– 6/28
22. महाभारत्– 1/74/38
23. मनुस्मृतिः 3/50
24. भगवद्गीता 7/11
25. महाभारतम् 1/111/23
26. दक्षस्मृतिः 4/14
27. मनुस्मृतिः 9/166
28. कामसूत्रः 1/5/1
29. मनुस्मृतिः 3/12–13
30. हिन्दू विवाह मीमांसा पृ. 37
31. ऋग्वेदः 10/85
32. तत्रैव 1/11/6/1